# Shri Pitambarashtakam

# श्रीपीताम्बराष्टकम्

## Document Information

Text title : pItAmbarAShTakam

File name : pItAmbarAShTakam.itx

Category : devii, aShTaka, devI

Location : doc_devii

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : August 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीपीताम्बराष्टकम्

ज्ञेयं नित्यं विशुद्धं यदपि नुतिशतैर्बोधितं वेदवाक्यैः
सच्चिद्रूपं प्रसन्नं विलसितमखिलं शक्तिरूपेण ज्ञातुम् ।
शक्यं चैतां प्रजुष्टां भवविलयकरीं शुद्धसंवित्स्वरूपां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ १॥

गौराभां शुभ्रदेहां दनुजकुलहरां ब्रह्मरूपां तुरीयां
वज्रं पाशं च जिह्वामसुरभयकरीं लौहबद्धां गदाख्याम् ।
हस्तैर्नित्यं वहन्तीं द्विजवरमुकुटां स्वर्णसिंहासनस्थां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ २॥

कौर्मरूपं विधात्रीं कृतयुगसमये स्तब्धरूपां स्थिराख्यां
हारिद्रे दिव्यदेहां विबुधगणनुतां विष्णुना वन्दितां ताम् ।
आनर्चुः स्कन्दमुख्याः स्मरहरमहिलां तारके संविवृद्धे
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ३॥

आधारे तत्त्वरूपां त्रिबलयसहितां योगिवृन्दैः सुध्येयां
पीतां रुद्रेण सार्धं रतिरसनिरतां चिन्तयित्वा मनोज्ञाम् ।
गद्यं पद्यं लभन्ते नवरसभरितं सान्द्रचन्द्रांशुवर्णा
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ४॥

मायाबीजं महोग्रं पशुजभयहरं भूमियुक्तं जपन्ति
पुत्रैः पौत्रैः समेताः प्रणिहितमनसः प्राप्य भोगान् समस्तान् ।
लब्ध्वा चान्ते विमोक्षं विगतभवभया मोदमाना भवन्ति
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ५॥

ध्यानं मातस्त्वदीयं जपमनुसततं मन्त्रराजस्य नित्यं दुष्टैः
कृत्या स्वरूपा बलग इति कृता आशु शान्तिं प्रयान्ति ।
तस्मादाख्यां त्वदीयां द्विभुजपरिणतामुग्रवेषां सुभीमां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ६॥

जप्त्वा बीजं त्वदीयं यदि तव सुजनो याति विद्वेषिमध्ये
रूपं दृष्ट्वा तदीयं रिपुजनसकलः स्तम्भनं याति शीघ्रम् ।
गर्वी सर्वत्वमेति श्रवणपथगते नामवर्णे त्वदीये
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ७॥

ब्रह्मा विष्णुर्महेशो जपति तव मनुं भावयुक्तं महेशि!
लब्ध्वा कामं स्वरूपं समरसनिरता दिव्यभावं भजन्ते ।
तामेवाहं भवानीं भवसुखविरतो भावयुक्तं स्मरामि
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम् ॥ ८॥

धन्यास्ते भक्तियुक्ताः सततजपपरा हीनवर्णेऽपि जाता
वैमुख्ये लग्नचित्ता यदपि कुलपरा नो प्रशस्याः कदाचित् ।
इत्थं सञ्चिन्त्य मातः । प्रतिदिनममलं नामरूपं त्वदीयं
सर्वं सन्त्यज्य नित्यं सततभयहरे! कीर्तये सर्वदाऽहम् ॥ ९॥

स्तोत्रेणाऽनेन देवेशि! कृपां कृत्वा ममोपरि ।
बगलामुखि! मे चित्ते वासं कुरु सदाशिवे! ॥ १०॥

यः कश्चित् प्रपठेन्नित्यं प्रातरुत्थाय भक्तितः ।
तस्य पीताम्बरा देवी शीघ्रं तुष्टिं समेष्यति ॥ ११॥

प्रयतो ध्यानसंयुक्तो जपान्ते यः पठेत् सुधीः ।
धनधान्यादिसम्पन्नः सान्निध्यं प्राप्नुयाद् द्रुतम् ॥ १२॥

ॐ इति श्रीपीताम्बराष्टकं समाप्तम ।

इदं श्रीपीताम्बराष्टकं श्रीपरमहंसपरिव्राजकाचार्यवर्यैः
श्रीस्वामि पादैरकारि तेषां शुभप्रेरणया दतियानगरस्य
श्रीवनखण्डेश्वरस्य सन्निधौ श्रीपीताम्बरभगवत्याः
स्थापनं ज्येष्ठकृष्णस्य पञ्चम्यां तिथौ सम्वत् १९९२
वैक्रमे गुरुवासरे महता समारोहण जातम् । अस्मिन् वर्षे १९९७
वैशाखमासस्य शुक्लषष्ठ्यां पञ्चमकवि नामनि पर्वतशिखरे
श्रीताराभगवत्याः पीठस्थानमपि तेषामेवानुग्रहेण स्थापितमभूत्,
तदवसरे श्रीताराकर्पूरस्तोत्रस्य व्याख्यां कर्तुं तैरेव परमानुग्रहः
प्रादर्शि । पीठद्वयस्याऽयमेव पुस्तकरूपः सङ्क्षिप्तपरिचयः ।

Encoded and proofread by lalitha parameswari parameswari.lalitha at gmail.com

*Shri Pitambarashtakam*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*